(5)

In Public Domain. Digitization by eGangotri and Sarayu Trust.

Prakṛti

The Integral Vision

Vol. 2

Vedic Buddhist and Jain Traditions

Lecture Delivered at the University of Poona
"Indira Gandhi Memorial seminar"
by N.S. Doraiswamy Aachariar

28-1-98

119/

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust



Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

2

पञ्चभूततत्त्वनिरूपणम्

श्रीदेवनाथ ताताचार्यः

हरिः ओम्, नमस्सदसे। नमस्सदसस्पतये। हरिः ओम्

तच्छंयोरावृणीमहे। गातुंयज्ञाय। गातुंयज्ञपतये। दैवीस्स्वस्तिरस्तुनः।
स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातुभेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।
ओम् शान्तिश्शान्तिश्शान्तिः

पुण्यतममिदं पुण्यपत्तनं, नाम्नैव विश्वविख्यातं विराजते। अत्र समवेतान् नानाशास्त्रपरिचयसंपन्नान् पण्डितप्रकाण्डान् प्रणम्य उपात्तविषये मदभिप्रायमाविष्करोमि। श्रुत्वा विद्वांसः प्रमाणम्।

(१) पृथिवी (२) आपः (३) तेजः (४) वायुः (५) आकाशः — इति पञ्चमहाभूतानि प्रपञ्चस्वरूपं निष्पादयन्ति। प्रपञ्चस्य उत्पत्तौ स्थितौ विनाशे (प्रलये) च इमानि पञ्च महाभूतानि प्रधानतरं भागं निर्वहन्ति। पञ्चभूतान्येव प्रपञ्चात्मना परिणमन्ति-ईश्वरसंकल्पविशेषेण, तेनैव च कारणेन यथोद्दिष्टकालं यावत् तिष्ठन्ति, तेनैव च कारणेन सूक्ष्मरूपतां प्रापिताः यथोत्पत्ति प्रलीयन्ते। अस्मिन् विषये भवगतः इच्छारूपः संकल्प एव प्रधानं कारणम्। स च, तत्तज्जीवात्मनां प्राचीनकर्मसु भोगप्रदानौपयिकतया परिणतेषु जायते। जातश्च कञ्चित्काल-मवस्थाय पुनरपैति। सर्वशक्तस्य भगवतः इदं सृष्टिस्थितिप्रलयं लीलारूपम्। अतएव च "लीला विभूतिः" इति परिदृश्यमानस्य प्रपञ्चस्य शास्त्रेषु व्यवहारः एवंविधप्रपञ्चबहिर्भूतोऽप्यन्यः प्रपञ्चभागो वर्तते। तत्र एवं विधः परिणामो न भवति। एकरूप एव सर्वदाप्ययं वर्तते। तस्य "नित्यविभूतिः" इति शास्त्रेषु व्यवहारः। तत्प्राप्तिरेव जीवात्मनां अपहतपाप्मनां मोक्षः "ब्रह्मानन्दानुभवः" इत्यादिशब्दैः शास्त्रेषु व्यपदिश्यते। इदं वेदेषु-उपनिषत्सु — तदनुसारिषु भगवद्गीता-विष्णुपुराणादिग्रंथेषु च प्रतिपाद्यते। इयं रामानुजीयानां "विशिष्टाद्वैतमतानुसारिणी प्रक्रिया। द्वैताद्वैतमतानुयायिनोऽपि इममेव विषयं ईषदन्यथाभावेन प्रतिपादयन्ति। तत्र अद्वैतं बौद्धमतच्छायानुसारि-अथापि न वेदबाह्यं — नापि नास्तिकमतम्।

पञ्चधासंभृतः कायो यदिपञ्चत्वमागतः।
कर्मभिः स्वशरीरोत्थैः तत्र का परिदेवना?।।

इति महर्षिः याज्ञवल्क्यस्य दिव्यसूक्तिः।

Bharatiya Vidya Bhavan's Sri Sankaracharya Granthamala
119
Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पञ्चानां भूतानां सृष्ट्युपयोगितया परिणामप्रकारः वेदेषु विस्तरेण प्रतिपाद्यते। तथा मूलप्रकृतेः पर्वक्रमेण तत्तदवस्थावाप्तिश्च। तमः-प्रकृतिः-महान्-अहंकारः-इतीमाः चतस्रः अवस्थाविशेषाः पञ्चभूतप्राक्कालीनाः वर्तन्ते। भूतानां अत्यन्तसूक्ष्मावस्था एताः। क्रमेण विकसितावस्थाप्राप्तौ "पञ्चभूतं" पदेन निर्देशो जायते। यथा — कुसूले विद्यमानेषु बीजेषु अङ्कुराद्यवस्था नास्ति। जल-कर्दमादि संयोगे, पर्वक्रमेण अङ्कुरोत्पत्तिं पश्यामस्तेषु। तत्र बीजस्य अविकृतस्य स्थितिः "मूलप्रकृतिः" इति व्यपदेशार्हाभवति। पर्वक्रमेण तस्मिन् बीजे परिदृश्यमानाः विकासविशेषाः, महान्-अहङ्कार-इत्यादि पदैः व्यपदिश्यन्ते। विकासनिष्पत्तौ "अङ्कुर" पदेनव्यवहारः। एवमेव सूक्ष्म-स्थूल प्रपञ्चस्य परिस्थितिः। सर्वेषां कार्याणां सोपादानकारण एव लयस्य आनुभविकत्वात् यथा सृष्ट्येवं प्रलयोऽपि जायते नान्यथा।

भूमिरापोऽनलोवायुः खं मनोबुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।
अपरेयं इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो यया संधार्यते जगत्।।

इति भगवद्गीता सूक्तिः अन्यान्यौपनिषदानि वाक्यानि च वस्तुतत्त्वमिदमुद्घोषयन्ति।

वेदबाह्याः बौद्धाः जैनाश्च इमां प्रक्रियां नाङ्गीकुर्वन्ति। आद्यानि चत्वारिमहाभूतान्येव तैरङ्गीक्रियन्ते। पञ्चमस्य आकाशाख्यस्य भूतस्य न तन्मते अङ्गीकारो वर्तते, नतरां कालदिगात्मनाम्। कुतः ? शशशृङ्गवदसत्त्वादेव चतुर्णान्तु भूमि वार्यनलानिलरूपाणां प्रत्यक्षत्वान्नास्ति तेषु विसंवादावकाशः। "न हि दृष्टे अनुपपन्नं नाम"। पूर्वमीमांसाभाष्यकृत् शबरस्वामी एवमेव हि वदति —

अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः।
चतुर्भ्यः खलु भूतेभ्यः चैतन्यमुपजायते।।

इत्यादयः तेषां व्यवहाराः।

एवं नास्तिकदर्शनेषु सदसद्भावविचारः आकाशादिष्वेव विपुलो दृश्यते। तत्रापि आकाशविषय एव विस्तृतः। तस्याभावे प्रसाधिते तुल्यन्यायतया तदतिरिक्तानां कालादीनामभावः अक्लेशेन साधितप्रायो भवेदि।

तत्र धर्मकीर्तिः अतिप्रौढ़ पण्डितः स्वीये "प्रमाणवार्तिक" ग्रंथे इमं विषयं प्रस्तौति। तदीयव्याख्याग्रंथेषु च ससंरंभं प्रपञ्चितो वर्ततेऽयं विषयः। किञ्चिदेवात्र प्रदर्श्यते —

नावस्थितेर्विघातोऽस्ति यदि भूतान्तरस्थितिः।
परस्यस्याभावेऽपि न विघातोऽस्त्यवस्थितेः।।१२८।।
महाभूतान्तराभावे महाभूतान्तरस्थितिः।
महाभूतान्तराभावमात्रमाकाशमुच्यताम्।।१२९।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लोष्टस्य कथमाधारो नाकाशं पतत: क्वचित्।
वायौ गतिमति व्योम्न: कथमाधारतागति: ?।।१३०।।
वायोर्गत्यविबंधश्चेत् आकाशात् नेदमुत्तरम्।
गतेर्विबंधाभावो हि विबंधकविनाकृत:।।१३१।।

अथ

आकाशं व्यापिनित्यञ्च धार्यतेऽन्येन तत्कथम्?।
तेनानाधारता तस्य परं प्रति तु धारकम्।।१३२।।
व्यापित्वमात्मनोऽप्येतत् तदवस्थमरूपि च।
तस्यैवाधारभाव: किं परं प्रति न कल्प्यते?।।१३३।।
यस्यात्मा नास्ति तादृक्षस्तस्याकाशेन का क्रिया?।
दिशोऽपि व्यापिता आकाशकृत्यं ताभि: प्रकल्प्यताम्।।१३४।।
परस्परव्यापितायामेकत्वं व्यापिनां न किम्?।
उपघातो यतस्तस्य तस्याभावेन तस्य स:।।१३५।।
आकाशान्नोपघातस्तु व्यक्तमाकाशचर्वणम्।
तस्मादभावो भूतानां चतुर्णां व्योम कथ्यते।।१३६।।
तदन्यत्र महाभूते व्यवहारोऽस्ति न प्रमा।

इति परार्थानुमानप्रकरणे "शब्दचिन्तायां" विलिखति स:। तत्कर्तृके "न्यायबिन्दु" नाम्न्यपि ग्रंथे अयं विषय: सम्यगेव निरूपितो विराजते।

अस्य प्रमाणवार्तिकग्रंथस्य अन्या अन्या: व्याख्याग्रंथा विलसन्ति। प्रज्ञाकरगुप्तनाम्ना महाविदुषा अस्य प्रमाणवार्तिकस्य "वार्तिकालंकार:" इति व्याख्या विरचिता विराजते।

आकाशास्तित्ववादिनां मतमनूद्य निपुणतरं दूषयत्ययं तत्पक्षं स्वव्याख्यायाम्। "कुड्यादिषु पुरतो वर्तमानेषु गतिमतां गमनं तै: व्याहन्यते। तदतिलंघ्य गन्तुं न खलु ते शक्नुवन्ति। असत्सुतुतेषु प्राणिनां अप्राणिनां वा यथासंभवं गमनं दृष्टम्। अत: आकाशमेवैकं अन्येषां पदार्थानां अवकाशं ददाति-गमनादिप्रतिघातश्च आकाशे न विद्यते। तस्मादप्रतिघातरूपेण लिङ्गेन आकाशस्य सत्तां साधयाम:" इति हि ते वदन्ति।

तत्रायं पृच्छति — "किमिदमवकाशदानं नाम?" इति। तत्र तेषामुत्तरं — "अवस्थितेरव्याघात:" इति। तदुपरि अस्य प्रश्न: — अथ केयं स्थिति:? किं धार्यमाणता? अथ अविहन्यमानता? यदि धार्यता-तदसत्। नाकाशेन घटादयो धार्यन्ते, अपितु भुवा। अथ अनुपघात:? तदप्यसत्यं, यत: —

उपघातो यतस्तस्य तस्याभावेन तस्य स:।
आकाशान्नोपघातस्तु व्यक्तमाकाशचर्वणम्।। इति।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तस्मादभावो भूतानां चतुर्णां व्योम कथ्यते —पृथिव्यादि भूतचतुष्ट्याभाव एव आकाशशब्देन अस्तित्ववादिभिः व्यपदिश्यते, नातिरिक्तं पञ्चमं भूतं आकाशनामकमस्तीति साधयति। कुड्यादेः गतिं प्रतिबन्धकस्याभावे यथेच्छं गमनं भवति। तत्सत्त्वे तु न। अतः कुड्यादिः गमनस्य प्रतिबंधकः। तदभाव एव तत् कारणम्। प्रतिबंधकसंसर्गाभावस्य कार्यसामान्यं प्रति कारणत्वस्य सर्वसंमतत्वात्। अतिरिक्तस्य आकाशाख्यस्य भूतस्य तत्कारणत्वकल्पना निराधारा। चक्षुष्मान् कश्चित् कुड्यादिना व्यवहितं, दूरस्थं, सूक्ष्मं च वस्तु न द्रष्टुं शक्नोति। व्यवधानापगमे सति सामीप्ये सति स्थूलत्वेऽपि वा सति पश्यत्येवायम्। तस्य तथाविधवस्तुदर्शने चक्षुरेव कारणमङ्गीक्रियते सर्वैरपि। नातिरिक्तं किञ्चित्। कुड्यादयस्तु दर्शनप्रतिबंधकाः। तदभावः प्रतिबंधकसंसर्गाभावविधया सर्वसाधारण्येन तत्र कारणीभावं प्रपद्यते, नातिरिक्तस्य कस्यापि तत्र कारणत्वकल्पना। अतः अवकाशदानाख्ययुक्त्या नाकाशस्य साधनं साध्यमिति।

एवं अवकाशप्रदत्वेन आकाशस्य प्रसाधने अनवस्थापि प्रदर्शिता तत्र। तद्यथा —

"ननु महाभूतान्तरस्य वाय्वादेः क्वावस्थानं? यदि नाकाशम्। नन्वाकाशस्यापि क्वावस्थानं ? यदि महाभूतान्तरं न भवेत्। इत्यनवस्था। अथाकाशमनाधारस्वभावं, आधारश्चान्यस्य इति चेत्; वायुरपि तर्हि अनाधारस्वभावोऽन्यस्याधार इति अर्थान्तरपरिकल्पना न साध्वी। पूर्वोपदर्शितप्रमाणवार्तिकश्लोकयोः १३०-१३१ संख्यातयोः इत्थं विवरणं क्रियतेऽत्र।

"छिद्रमेवाकाशम्। अच्छिद्रकारकाभावे च तद्व्यवहारः।" इति आकाशास्तित्ववादिनां उक्तिमनूद्य दूषयत्ययम्। "यदा वा अच्छिद्रकारिणोऽभावः तदा आकाशं क्व गतवत्? नहि पार्श्वविदारणमुच्यते। व्योम्नस्तदभावे च तत्र चान्यत्र वा क्व गतमाकाशम्? विनष्टश्चेत्; साध्वी नित्यता। तत्रैवास्तु, इति चेत्; अच्छिद्रमाकाशमिति च व्याहतम्। तत्राप्यस्त्येव। अन्यथा तस्य पदार्थस्य स्थितिरेव न स्यात्" इति।

ईश्वरात्माकाशदिक्कालादीनां असत्त्वं अर्थक्रिया सामर्थ्यहीनतया तदुपोद्घाते निरूपितमस्ति। "अर्थक्रिया" इति पदस्य च विवरणं, "अर्थस्य-दाहपाकादेः, क्रिया-निष्पत्तिः, तस्याः स्थितिः अविचलनं अविसंवादनं व्यवस्था वा।"

"अर्थकरणमेव प्रयोगरूपेण केवलं सत्ताव्यापकं अभिज्ञायते।"

इति च तत्रत्यानि वाक्यानि भाव्यानि।

"यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभासभेदः, तत् स्वलक्षणम्" इति न्यायबिंदौ कथयन् धर्मकीर्तिः स्वलक्षणविरहेण आकाशाख्यस्य वस्तुनोऽसत्तां साधयति। शशशृङ्गमेवात्रोदाहरणम्। ज्ञानप्रतिभासभेदः यथा शशशृङ्गसत्त्वासत्त्वाभ्यां नोपजायत इति तुच्छत्वमेव तस्य सर्वाभ्युपगतम्, तत्राकाशे को वा भेदः? न हि आकाशस्य सत्त्वेनअसत्त्वेन वा ज्ञानप्रतिभासे कश्चित् भेदः अनुभूयते। अतस्तुच्छत्वमेवास्य इति प्रसाध्यतेऽत्र गुडस्य-लवणस्य-मरीचिकायाः वा सत्त्वेअसत्त्वे वा अथवा न्यूनाधिकभावे, रुचिभेदं अनुभवामः। अयमेव ज्ञान प्रतिभासभेदः सार्वजनीनः। इदमेव च "स्वलक्षणं" इति च कथ्यते। एवंविधे स्वलक्षणे प्रसिद्धे सत्येव तद्विशिष्टस्य वस्तुनः सद्भावः सर्वैरपि निर्विवादः अङ्गीक्रियते। शशशृङ्गस्य आकाशस्य वा न ह्येवंविधं स्वलक्षणमस्ति। तस्मान्नास्त्येव तत्। इति तर्कं प्रदर्शयति धर्मकीर्तिः।

अर्थक्रियाकारित्वे सत्येव वस्तुसिद्धिः इति वादः प्रामाणिक एव। तथैव स्वलक्षणसत्त्वञ्च वस्तुसत्ता स्थापकमित्यपि। आकाशादौ इदमुभयं नास्तीति यदुच्यते तत्रैव विप्रतिपत्तिः नैयायिकादीनां वैदिकानाम्। आकाशादिषु

Bharatiya Vidya Bhavan, New Delhi Collection.

In Public Domain. Digitization by eGangotri and Sarayu Trust

इदमुभयमपि विद्यत एव। तस्मात् तेऽपि प्रमाणसिद्धा एव भवन्ति। परन्तु पामरजनहृदयङ्गमतया आपातप्रतीतौ इदं निरूपयितुं न शक्यते। निपुणनिरूपणेन इदं शक्यमेव प्रदर्शयितुम्। "न हि यत् गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम्" इति अभियुक्ता वदन्ति। सिद्धा अपि सोपपत्तिकमेव स्वपक्षं समर्थयितुं प्रयतन्ते। तथापि पामरजनसमूह-वशीकरणैकपरैः तैः बहवो युक्त्याभासाः बहुशः उपयुञ्यन्ते। यथाहुः कुमारिलभट्टपादाः

शाक्यादयश्च सर्वत्र कुर्वाणा धर्मदेशनम्।
हेतुजालविनिर्मुक्तं न कदाचन कुर्वते।।

इति। तथा "उक्खित्तेलोऽम्मि उक्खेवे अत्थि कालणं, पदणे णत्थि कालणं, तस्मात् सव्वे भावा सकालणा उप्पज्झन्ति, अकालणा विणसन्दि" इति च।

बौद्धमते सर्वेषां पदार्थानां उत्पत्तौ प्रतिनियतं कारणमावश्यकम्। विनाशे तु न किञ्चित् कारणमस्ति। नाशः स्वाभाविकः। इमं सिद्धान्तं पामरजनान् बोधयितुं ते पूर्वोक्तं दृष्टान्तं प्रदर्शयन्ति।

भूमौ स्थितं लोष्टं हस्ते गृहीत्वा प्रदर्शयन्ति। अयं लोष्टः भूमौ विद्यमानः स्वयमेव आकाशे गच्छति वा? नहि नहि। हस्तेनादाय उत्क्षिप्तश्चेत् उपरि गच्छति। तस्मात् लोष्टस्य उपरिगमनं कारणसापेक्षम्। इत्थमेव सर्व-वस्तूनामुत्पत्तिः कारणसापेक्षा। उपरिक्षिप्तो लोष्टः किं तत्रैव तिष्ठति? नहि नहि। सत्वरं भूमौ पतति। तत्र किं कारणम्? न किमप्यस्ति। इत्थमेव सर्वेषां पदार्थानां किञ्चित्कारणमनपेक्ष्यैव स्वाभाविको विनाशो जायते इत्युपपादयन्ति ते। अत्र कियदौचित्यमस्तीति न निरूपणीयं विमर्शकानाम्। लोष्टस्य ऊर्ध्वगमनं पदार्थानामुत्पत्तेः नोपपन्नमुदाहरणम्। नापि तत्पतनं विनाशस्य। पामरजनाः इत्थं प्रलोभ्यन्ते तैः। आकाशविषयेऽप्ययमेव न्यायः तैराश्रितः।

तस्मादागमिकम्" (वैशेषिकसूत्रं २.१.१७)

इति सूत्रं प्रत्यक्षतोऽनधिगतेषु अनुमानसीमानमप्यतिलंघितेषु सूक्ष्मतरेषु आगमस्यैव प्रमाणत्वमभ्युपगच्छति कणादः। प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयेनैव तृप्तः भगवान् कणादमहर्षिः सूक्ष्मतरेषु विषयेषु वेदं प्रमाणयति। किमुतास्मादृशाः वयं ?। कणादमहर्षिः मतान्तरप्रतिक्षेपपूर्वकं आकाशाख्यं पञ्चमं भूतं शब्दाख्यगुणविशेषेण लिङ्गेन साधयति चतुर्भिस्सूत्रैः।

(१) कारणगुणपूर्वकः कार्यगुणो दृष्टः। (वैद. २.१.२४)

(२) कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः। (वैद. २.१.२५)

(३) परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः। (वैद. २.१.२६)

(४) परिशेषाल्लिङ्गमाकाशस्य। (वैद. २.१.२७)

इतीमान्येव तानि चत्वारि सूत्राणि।

एतेषु चतुर्थसूत्रं शब्दरूपात् लिङ्गात् आकाशाख्यस्य पञ्चमस्य भूतस्य सत्तां साधयति। "श्रोत्रग्राह्यो योऽर्थः स शब्दः (वैद. २.२.२१) इति सूत्रेण शब्दाख्यो गुणः श्रोत्रेण गृह्यत इत्युक्तम्। तस्य शब्दस्य वीणावेण्वादिद्रव्यनिष्ठ-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्वस्यानुपपत्त्या तदाधारतया आकाशाख्यं द्रव्यं सिद्ध्यतीति युक्त्या आकाशास्तित्वं साधयति। पूर्वाणि त्रीणि सूत्राणि शब्दस्य अन्यद्रव्यगुणत्वं युक्तिभिः निराकुर्वन्ति। वीणायां वाद्यमानायां सभामध्यासीनाः सर्वे वीणानादं श्रुत्वा सन्तुष्टमानसा भवन्ति। वीणायाः व्यवहिते देशे उपविष्टा अपि यथावस्थितं वीणानादं सम्यक् शृण्वन्ति। यदि वीणारूपे द्रव्य एव शब्दः स्यात्, व्यवहितैः न श्रूयेत। आकाशाधारत्वं तु शब्दस्य, वीणावादनप्रदेशे आकाशे उत्पादितः शब्दः स्वसजातीयान् अन्यान्यान् शब्दान् वीचीतरङ्गन्यायेन जनयन् श्रोत्रेऽपि शब्दान्तरमुत्पादयति — तदेव च श्रोत्रेण गृह्यते इत्युपपद्यते व्यवहितदेशस्थस्यापि शब्दप्रत्यक्षम्। अतः शब्दः आकाशसत्त्वे लिङ्गम्। "निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम्" इति (वैद. २.१.२९) सूत्रेण चलनात्मकक्रियायाः अवकाशदानमाकाशेनैव क्रियत इति सांख्यमतमत्रैव समनन्तरसूत्रेण खण्डितम्। बौद्धैरपि इदमवकाशदानरूपं लिङ्गं बहुधा खण्ड्यते। पृथिव्यादीनां गुणाः कारणगुणपूर्वका एव दृश्यन्ते। तन्तुरूपस्यैव पटे दर्शनात्। शब्दस्य वीणादि निष्ठत्वे वीणा-समवायि कारणीभूतेषु तदवयवेषु पूर्वतरं तस्य स्थितिः निरूपयितव्या। न च तथास्ति। अतः शब्दो न पृथिव्यादिद्रव्यगुणः। तदाधारतया अतिरिक्तमाकाशाख्यं पञ्चमं भूतं सिद्ध्यतीति कणादमहर्षेराशयः।

आवारकस्य गमनप्रतिबंधकस्य कुड्यादेरभाव एव आकाशशब्देन निर्दिश्यते, तदतिरिक्तं पञ्चमं भूतं नास्तीति वदतां बौद्धानां स्वमताभिनिवेश एव तत्र मूलम्। यो निबंधे तर्ककौशलञ्च। आकाशाख्यस्य पञ्चमस्य भूतस्य अङ्गीकारेण भगवतो बुद्धस्य सर्वलोकहिततमोपदेशानां ईषदपि हानिर्नोपजायते। अविकसितधिषणानां पामरजनानां प्रौढयुक्त्यनुसंधानं न सुलभम्। स एव मुख्योहेतुस्तेषां वादस्य। प्रतिबंधकस्य कुड्यादेरभावं सर्वे पामरजनाः अनायासेन वक्तुं शक्नुवन्ति। तावति तेऽपि विश्राम्यन्ति। अतिसूक्ष्मस्य आकाशाख्यस्य तत्त्वस्य सत्त्वं तर्ककौशलेन साधयितव्यम्। अत एव तेषामत्रन प्रवृत्तिः, न खलु पामरजनास्तत्र प्रभवः।

छान्दोग्योपनिषदि षष्ठप्रश्ने-द्वादशखण्डे श्वतकेतोरुद्दालकस्य च संवादः —

> "न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति ।।1।। तं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति। श्रद्धत्स्व सोम्येति।।2।। स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो"

इति वाक्यानि विद्यन्ते। न्यग्रोधफलस्याभ्यन्तरे न किञ्चिद् इति वदन्तं श्वेतकेतुं शिष्यं आचार्यो बोधयति अतिमहान् न्यग्रोधवृक्षः अत्रैव वर्तते, श्रद्धत्स्व सोम्य इति। अत्रापि बौद्धाः श्वेतकेतोरेव शिष्यस्य पर्वणि विश्राम्येयुः। न तु तत् परमार्थः।

याज्ञवल्क्यस्मृतौ यतिधर्मप्रकरणे गर्भस्थः शिशुः पञ्चभ्योऽपि भूतेभ्यः तत्तदंशान् संगृह्य परिपूर्णो भवतीति वस्तुतत्त्वं विशदीक्रियते। अपां शैत्यमिव तेजसः उष्णत्वमिव च वस्तुतत्त्वमिदम्। नेदमपन्होतुं शक्यं केनापि। न वा कस्यचिन्मतस्य एतन्निषेधेन लाभो वा लोपो वा। पामरजनाः न समर्था एवंविधविषयमवगन्तुमित्येतावदेवात्र। "न ह्येषःस्थाणोरपराधो यदेनमन्धो न पश्यति"। पृथिव्यादिभूतचतुष्टयात् तत्तदंशानां गर्भस्थेन शिशुना संग्रहणात्पूर्वं भगवान् याज्ञवल्क्यो ब्रवीति —

"आकाशाल्लाघवं शौषिर्यं शब्दं श्रोत्रं बलादिकम्" इति।

CC-0. Bhartiya Vidya Bhavan. New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जातस्य शिशोः शरीरे इमे विषयाः वर्तन्त एव। तेषां संग्रहः आकाशादेव जायत इति महर्षिः ज्ञात्वैवोपदिशति।

वायोश्च स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च।
पित्तात्तु दर्शनं पक्तिं औष्ण्यं रूपं प्रकाशिताम्।
रसात्तुरसनं शैत्यं स्नेहं क्लेदं समार्दवम्।

इत्याद्यप्यनुपदमुपदिश्यत एवात्र। किमिदं सर्वं व्यामोहफलम्?

तथा व्याधिपीडितस्य वैद्यः नानाविधमूलिकादिनिर्मितं भेषजं दत्त्वा व्याधिं शमयति। भेषजसेवनकाले आहारनियमोऽपि व्याधिग्रस्थायोपदिश्यते। रस-वीर्य-विपाकादिकं तत्तद्वस्तुजातस्य वैद्य एव जानाति न व्याधिपीडितः। किं तत्रानास्था युज्यते? अर्थक्रियायत्तं वस्तुतत्त्वमिति वादो नात्र प्रसरं लभते। वस्तुतो विद्यमानाया अप्यर्थक्रियायाः स्थूलदृष्ट्या अपरिज्ञानात्। पश्चाज्जनिष्यमाणस्य स्वास्थ्यस्य तदभावस्य वा तदानीमज्ञानात् अनुमानैकसमधिगम्यत्वाच्च। अत्रापि बौद्धच्छात्रानुसारिणः विपरीतमेव वदेयुः। न त्वेतदुपपन्नम्।

गतिप्रतिबंधकस्य कुड्यादेरभाव एवाकाशः न तदतिरिक्तं वस्तु किञ्चित् इति वदन्तो बौद्धाः न खलु प्रतीतिस्वरूपं सम्यगवधारयन्ति। अभावज्ञाने नञ् पदप्रयोगः सर्वसाधारणः। घटो नास्तिपटोस्ति इति हि नञुपयोगेन वस्तुनोऽभावं जना व्यवहरन्ति। प्रतीतिर्नावरणाभावावलंबना, विधिरूपत्वात्। अतश्च इहावरणं नास्ति इत्यावरणाभावाश्रयतया इह-प्रत्ययालंबमस्मदभिमताकाशमेव।

इत्यादयः आकाशास्तित्ववादिनां सूक्तयोऽपि भाव्याः।

(श्रीमन्निगमान्तमहादेशिकविरचितं न्यायसिद्धाञ्जनम्) इह खगः पतति इति बुद्धौ पक्षिपतनाधारतया किञ्चिद्वस्तु नूनं दृश्यत एव। किन्तदन्यदाकाशात् ?

सद्रूपेणैव भानात् न भवति वरणाभावमात्रं विहायः
संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गि बोधः।
अत्यन्ताभाव नाशावजननिरपि वा सत्सु तेष्वेव न स्युः
तादात्म्याभावसिद्धिः कथमपि च भवेत्? तं तमर्थं विहाय।।

तत्त्वमुक्ताकलापग्रंथे श्रीमन्निगमान्तमहादेशिकश्लोकः।

अन्यच्चात्रावधेयम्। आकाशः शब्दः इति पदयोः अर्थः कः ? यं कञ्चिदर्थमवलंब्य वादिनो विवदन्ते। सर्वेऽपि यथार्थवादिन एव। शब्दो द्रव्यमिति मीमांसकाः। सः गुण एवेति तार्किकाः। स नित्य इति मीमांसकाः। अनित्य एवायमिति तार्किकाः। पूर्वमीमांसायां प्रथमाध्याये प्रथमपादे षष्ठमधिकरणं शब्दनित्यत्वाधिकरणं इत्येव व्यवह्रियते। अद्यत्वे सर्वसाधारणे यन्त्रमूलके शब्दप्रचारे निदानभूताः बहवो विषयाः अत्र सूत्रेषु भाष्ये च परिदृश्यन्ते। कण्ठताल्वादि-शब्दोच्चारणकारणीभूताः अवयवाः किं शब्दमुत्पादयन्ति? उत विद्यमानमेव शब्दमभिव्यञ्जन्ति? इति विचार्य निर्णीयतेऽत्र कण्ठताल्वाद्यभिघातेन वायवीयाः अवयवाः प्रणुद्यन्ते। ते नैरन्तर्येण स्तिमितताया विद्यमानानि वाय्वन्तराणि प्रतिबाधन्ते। तेन सत्र एव शब्दतत्त्वस्याभिव्यक्तिर्जायते न शब्द उत्पाद्यते तैः। अत्र

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शाबरभाष्यं — "अभिघातेन हि प्रेरिता वायवः स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् संयोग-विभागानुत्पादयन्ति, यावद्वेगमभिप्रतिष्ठन्ते। ते च वायोरप्रत्यक्षत्वात् संयोगविभागा नोपलभ्यन्ते। अनुपरतेष्वेव तेषु शब्द उपलभ्यते, नोपरतेषु। अतो न दोषः। अत एवानुवातं दूरादुपलभ्यते शब्दः" इति। "आकाशदेशश्च शब्दः" इति च। इदं तत्त्वनिरूपणं नानादरमर्हति। युगपत् उत्पन्नयोः द्वयोः पदार्थयोः एकतरस्य पूर्वं अन्यस्य पश्चाच्च उपलंभः अनुभवे वर्तते। ते वस्तुनी के? इति प्रश्नः महाभारते यक्षप्रश्ने दृश्यते। "विद्युत् गर्जितञ्च" इति तस्योत्तरं युधिष्ठिरेण दत्तम्। शब्दः आकाशे प्रयाति तेजोऽपि। तयोः तेजसः वेगवत्तरत्वं तात्त्विकं अत्र प्रतिपाद्यते। "शब्द" शब्देन अत्र किं निर्दिश्यते ? चलनवान् पदार्थः नित्यः विभुः शब्दः द्रव्यमेव, न गुणः इति मीमांसकमतम्। तदभिव्यञ्जकानां ध्वनीनामेवात्र शब्दशब्देन निर्देशः क्रियते। वाय्वभिघातवशात् ध्वनेः सर्वतो-दिक्कं प्रसरणं जायते, तेन च शब्दस्याभिव्यक्तिर्भवति। एतादृशं ध्वनिमेव शब्दशब्देन निर्दिशन्तो मीमांसकेतरमतस्थाः शब्दस्यानित्यत्वं वदन्ति।

अन्तर्धानं स्मृतिस्सौक्ष्म्यं दृष्टिः श्रोत्रज्ञता तथा।
निजं शरीरमुत्सृज्य परकायप्रवेशनम्।।
अर्थानां छन्दतस्सृष्टिर्योगसिद्धेश्च लक्षणम्।
सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते।।

इति वदन् योगीश्वरो याज्ञवल्क्यमहर्षिः गहनान् अनेकान् विषयान् विवृणोति। साधारणजनानां कुड्यादिभिः उपरोधे सञ्चारः प्रतिबध्यते। योगिनस्तु अप्रतिहतगतयो विराजन्ते। "सौक्ष्म्यं" इति तत्त्वं अत्र कारणतया प्रदर्श्यते। तथा दवीयसामपि वस्तूनां दर्शनं शब्दानां श्रवणञ्च योगिनां सुकरम्। तथा परकायप्रवेशश्च। एवमादिकं न सहसा निराकर्तुं शक्यम्। वेदेषु, "पृथिव्यै स्वाहा अग्नये स्वाहावायवे स्वाहा अद्भ्यस्स्वाहा, वनस्पतिभ्यस्स्वाहा, इत्यादि वाक्यैः जडपदार्थानां देवतात्वं प्रतिपाद्यते। नेदं मुग्धभाषितं न वा विप्रलंभकवचः। अत्र किञ्चिदौचित्यं संभावितमेव। तदन्वेष्टव्यम्। एकं उदाहरणं दर्श्यते।

सोमयागाङ्गं अग्नीषोमीयपशुयागः। तत्र पशुर्बध्यते। तदर्थं वृक्षस्य शाखा एका छिद्यते। तत्र स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन (वृक्षस्य) तेजः परापतति; प्रथमशशकलः परापतेत् तमाहरेत् स तेजसमेवैनमाहरति" इति श्रूयते। स्वधितिः इति छेदनसाधनस्य कुठारादेः नाम। तस्मात् शब्दात् पञ्चम्येकवचनान्तं पदं स्वधितेः इत्येतत्। त्रासार्थानां इति पञ्चमी। वृक्षः स्वधितेः बिभेति। कुतः? "मामयं छेत्स्यति" इति। अत्र वृक्षस्य भयं विस्पष्टं श्रूयते। तत् सूक्ष्मेक्षिकया ज्ञात्वा वेदो वर्दति। स्थूलदृष्ट्या नेदं ज्ञातुं शक्यम्। किमिदं न परमार्थः? अद्यतनाः वैज्ञानिकाः निपुणतरमिदं निरूपयन्ति। तथा "अग्ने! गर्भो अपां असि" "अग्निं या गर्भदधिरे" इत्यादि वेदवाक्यानि अप्सु अन्तः गर्भभृतः अग्निः वसति-इति कथयन्ति। आपातप्रतीतौ इदमनुपपन्नमिव। ज्ञानचक्षुषा तु सम्यगेव निरीक्ष्यते। अपां नपात् इति अग्निर्व्यपदिश्यते। नपात् – पुत्रः, पौत्रः, प्रपौत्रः, इत्यर्थः। प्रथमे-द्वितीये-तृतीये वा पर्वणि अद्भ्यः वैद्युताग्नेरुत्पत्तिं वैज्ञानिका निरूपयन्त्येव। अतः वेदो सर्वमेवानुपपन्नमति वादो न साधीयान्। परोक्षेषु येषु सहसा निषेधो न खलु सुशकः। 'अव्यतिरेकस्तु अर्थानुपलब्धे" इति भगवान् जैमिनिः इममेवार्थं कथयति।

शब्दोच्चारणकाले शरीरान्तर्भागे यादृशो व्यापारः प्रवर्तते, सिक्षाकाराः निरूपयन्तिः —

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

BVBSSMV

आत्माबुद्ध्या समेत्यार्थान्मनोयुंक्ते विवक्षया। १९

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।

इत्यादिना। एवं विधानि शिक्षाकारवचनानि वस्तुतत्त्वप्रतिपादकान्येव। वैज्ञानिकाः निपुणाः इदं सर्वं सम्यक् निरूपयितुं प्रभवन्त्येव। न तु पामरजनाः। तावता किमिदं सर्वं मिथ्यैव?। अतः आकाशाख्यस्य पञ्चमस्य भूतस्य ततोऽपि पूर्वतनानां अहंकारमहदादीनां तत्त्वं अप्रकंप्यमेव। साधारणजनदुर्विज्ञेयत्वमात्रेण एषामपलापो न युज्यते। नहि सर्वस्सर्वं जानाति।

English Translation of
"Pañcabhūtatattvanirūpaṇam"

The best of holy cities — this city of Pune, is well-known in the world. Offering my prostrations to the learned people well-versed in various *śāstras* and assembled here, I would like to express my thoughts before them for their consideration on the chosen subject.

Pṛthivī, āpaḥ, tejaḥ, vāyuḥ and *ākāśaḥ* are five *mahābhūtas* that constitute this universe. In the creation, continuation and destruction of this universe — the above five *mahābhūtas* play a major role. These five *bhūtas* transform themselves into *prapañca* by the desire of *Īśvara* and by that very same desire of God they continue to exist up to a particular period; by the very same *saṅkalpa* of God these *bhūtas* disappear. In this process the main cause is the desire of God. To give them the experience destined for them, according to the various deeds (*karmas*) of all the *jīvātmās* (souls), God creates this universe.

Thus created, it stands for some time and again disappears. This process of creation, existence and dissolution is described in the *śāstras* as the sport of Lord God. That is why this universe is called *Līlā Vibhūti.*

Apart from this universe, there is another part, which is not transformed like this universe. There is no change of any kind here. And this part is called *Nitya Vibhūti* and stands all the time without any change. To attain this place is what is called *mokṣa* or *Brahmānanda anubhava* attainable by only those who have overvcome their *puṇya* and *pāpa.* This fact is vouchsafed in the *Vedas, Upaniṣads, Bhagavad-Gītā, Viṣṇu Purāṇa* etc. This is the philosophical position of *viśiṣṭādvaita* of Bhagavān Rāmānuja. The followers of *dvaita* and *advaita* systems also explain this very same philosophy with little variations here and there. Though the *advaita* borders on the philosophy of Buddhism it is not *vedabāhya*, out of Vedic-fold, nor is it *nāstika.*

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Says Maharṣi Yājñavalkya —

> This body made up of these five *mahābhūtas* due to *karma*, when disintegrated into the five *bhūtas*, where is the need for sorrow?.

How the *mahābhūtas* become instrumental in the formulation of this universe is described in detail in the *Vedas*. *Mūla Prakṛti* in its subtle state is called *tamas*; it transforms itself into *mahat, ahaṅkāra* etc. There are three states of *Mūla Prakṛti* called *tamas, akṣara* and *avyakta* all of which are very subtle. Even the other transformations following these four states, namely *mahat, ahaṅkāra* and *tanmātras* are also subtle and when they attain the state of *vikāsa* they get the name *bhūtas*. As the seeds kept in a storage do not sprout, but when combined with water and mud, gradually sprout, in the same manner the non-transformed state of the seeds represents *Mūla Prakṛti*, because, when it attains *vikāsa* it represents the sprout. This is how the universe takes shape. All the created things dissolve into their origin, the cause, and this can be seen in our daily experience.

Those who follow the tenets of the Buddhism or Jainism do not accept this process. They accept only the four visible *mahābhūtas*. They do not accept *ākāśa* which is not experienced by any sense-perception. Nor do they accept the principles like *kāla* (Time), *dik* (Direction) and *ātmā* (Soul), because all these things are not experienced by the sense-perceptions, whereas in the case of other four *bhūtas* namely *bhūmi, jala, vāyu* and *agni*, there is no dispute, as experience cannot be denied. Thus, in the *nāstika* system of philosophy the only disputable point is about *ākāśa*.

If the non-existence of *ākāśa* is established by arguments and syllogism, on the same analogy the other unseen *tattvas* like *kāla* (Time) etc. can also be denied.

Dharmakīrti a well-known and erudite Buddhist scholar, in his work called *Pramāṇa Vārtika* discussed this aspect. It has also been dealt with in an exhaustive manner in the commentaries on that work. Let us consider some of those points :

1. There can be no destruction of an existence but only a transformation is possible.
2. When there is an absence of obstructing agent, then also that existence cannot be affected.
3. If there is absence of one *mahābhūta*, it means there is existence of another *bhūta* in its place.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

4. Thus the absence of the other four *mahābhūtas* is to be construed as *ākāśa* and nothing else.
5. How come *ākāśa* does not support a piece of stone thrown in the space?
6. *Vāyu* which is moving all the time is not supported by *ākāśa*. Why is it so?
7. If the reply is that *ākāśa* does not obstruct the movement of the Air, this is not the answer. Since the non-obstruction of the Air's movement is due to the absence of the obstructing agency.
8. Those who accept *ākāśa* say that it is all-pervasive and eternal. How is it that such a matter is not being supported by another? It comes to this that *ākāśa* does not need a support, but it is its own support that supports all the other things.
9. In that case we may ask, "why accept *ākāśa* alone as having no other support? Why not accept this in the case of others too"?
10. Direction (*dik*) is also all-pervading. Then why not accept this quality of *ākāśa* in direction itself?
11. There are several principles which are all-prevading, like *ātmā*, *kāla*, *vāyu*, *dik* etc. If these are all-pervading, how is it that all these do not become one?
12. The likely answer to this question is that there is no obstructing agency and thus they all have their own existence in all places. Simply saying that there is no obstruction from *ākāśa* amounts to building castles in the air. Thus, we may conclude that the absence of the four *mahābhūtas* is *ākāśa*. Other than this, accepting a matter separately and calling it *ākāśa* is not real.

The above arguments of Dharmakīrti are again discussed in detail in his other work called *Nyāya Bindu*. There are several annotations for *Pramāṇa Vārtika*, among which is the one called *vārtikālaṅkāra* by Prajñākara Gupta. In this *vyākhyā* the author recounts the arguments of those who accept *ākāśa* and gives counter-arguments very effectively.

When there is a wall in front, then the movement of objects is obstructed. These objects are not in a position to overcome the obstruction and go forward. But if there are no such obstructions then both living and non-living things move ahead. This is seen in experience. Therefore, the acceptance of *ākāśa* is supported by the reason of non-obstruction. All objects remain in the space

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

provided by *ākāśa* and *ākāśa* does not obstruct their movements.

This argument is countered below. What is meant by the phrase 'providing spaces'? The answer is "unobstruction of existence". What is this existence? Is it being supported by something else or is it a non-hindrance? If it is meant as getting support from another source, then it is wrong. Because things like pots etc., are not supported by *ākāśa* but by the earth. If the answer is non-hindrance, that is also wrong, because it is due to the absence of an obstructing agency. Therefore, the statement that *ākāśa* does not obstruct the existence of other things is null and void. Therefore, *ākāśa* means the absence of the other four *mahābhūtas* such as *pṛthivī*, and there is no fifth matter called *ākāśa*.

The absence of obstructing agencies like walls makes movement possible, if there is an obstruction then it becomes impossible. Thus the wall is an obstructing agent of movement. This is called *pratibandhaka*. The absence of *pratibandhaka* is a general cause for all created things. This is accepted by all the philosophers. Therefore, construing an element as *ākāśa* and positing it as the giver of space has no basis. A person with eyes cannot see a thing which is obstructed by a wall or if the object is at a long distance, or if it is very small in size. If the obstruction is removed, if the distance is decreased or if the size of the object is big enough, one can see it. In the perception of this object the cause is only the eye and nothing else. The wall and other things are obstructing agencies for perception. Therefore, the absence of the obstructing agency becomes a cause for all creations. No other cause may be construed in this regard. Therefore, acceptance of the fifth *bhūta*, *ākāśa* on the basis of the argument that it provides space for all other things is untenable.

If *ākāśa* is providing space then where do the other *mahābhūtas* like *vāyu* stand, and where does *ākāśa* itself exist? If there is no need for a sixth *mahābhūta* and *ākāśa* is capable of providing space both for itself and for other *bhūtas*, then *vāyu* also can be construed as of that quality.

For the question, "What is *ākāśa*" the answer given by Prajñākara Gupta is this :

> *Ākāśa* means an opening or hole and this is made possible by the absence of some matter occupying space. If it is the absence of a matter which occupies space, then, where was *ākāśa*? One cannot say that it tore away through the sides. In both cases of existence and non-existence of *ākāśa*, where the *ākāśa* did go cannot be answered. If it is said that *ākāśa* was destroyed, then well done of its eternality! if it is said that all the time *ākāśa* itself was there, then absence of space and existence of *ākāśa* cannot

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

go hand in hand. The existence and non-existence of a thing cannot exist simultaneoulsy.

Īśvara, ātmā, ākāśa, dik, kāla etc., are not existing things, because they do not create or contribute in the creation of another thing visible, that is, absence of *artha kriyā*. This is another reasoning. Earth causes burning, cooking etc., there is *artha kriyā*. *Kriyā* means coming into existence of a new object. Non-happenings of these movements or non-agreement of same is called the absence of *artha kriyā*. Wherever there is existence, one can see the coming into being of another object or transformation.

With the existing of a particular thing or its absence, if some knowledge is obtained by its absence, then that is called *svalakṣaṇa*. That is how Dharmakīrti defines *svalakṣaṇa* in his *Nyāya Bindu* and by the absence of this so-called *svalakṣaṇa* he establishes the absence of *ākāśa*. There he cites the example of the horns of a hare: whether the hare's horns exist or not, there is no change in the knowledge. This is called *tuccha*. Non-existence, in the same manner, such as, whether *ākāśa* exists or not, indicates that no change occurs in the perception. Therefore, *ākāśa* does not exist. We experience differences in taste when there is more sugar or less, or salt or chillies in our food. This is what is called difference in perception. Known to all and sundry, this is also called *svalakṣaṇa*. If such definitions of *svalakṣaṇa* are known, only then the existence of an object can be accepted by all and without any controversy. In the case of the horns of a hare or *ākāśa* there is no such *svalakṣaṇa* and, therefore, there is no *ākāśa*.

The existence of a thing can be accepted only when there is *artha kriyā* and this is a correct proposition. Likewise, the existence of *svalakṣaṇa* also confirms the existence of a thing. *Ākāśa* does not possess either of the above two qualities as stated by the Buddhist. Only here the *vaidikas* differ. They say that both qualities do exist in *ākāśa*. Therefore, *ākāśa* is to be accepted as real and existing. But the difference is in the perception of laymen and thinkers. It cannot be convincingly proved to exist to the experience of laymen. Whereas for an analytical thinker, it can be proved. A thing that is obtained after climbing the hill cannot be called invisible before climbing. Both sides give all the possible reasonings, but the Buddhists use many false illustrations and syllogisms to attract the laymen.

Kumārila Bhaṭṭa says this — the followers of Buddha all the time preach *dharma* but never without reasoning. According to the philosophy of the Bauddhas, all the things in their creation need definite causes but in their destruction they do not need any cause, because destruction is natural; not the creation. To teach this tenet to ordinary people they always use several examples. For example:

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

> Taking a pebble from the ground they say that the pebble does not go up in the space by itself. If thrown up by us, up it goes. Therefore, the pebble's going up is dependent on some causes. In the same manner, the creations of all things depend on causes. But, once thrown up, the pebble does not stand in the space itself; it immediately comes down. What is the cause for this? There is nothing visible. Likewise, all created things without another agency, get destroyed naturally and by themselves.

In the example cited above, one can analyse how much reasoning is involved in it. Citing the example of a pebble's going up caused by an agency does not properly fit in for proving that all created things need an agency for their coming into being. Gullible people are led to believe anything by this sort of exposition. In the case of *ākāśa* also these logicians have adopted a similar method. The *Vaiśe. Sūtra* — (2-1-71) tells us that in those cases where knowledge cannot be gained through *pratyakṣa* or *anumāna* such subtle matters are to be known only by the authority of the *Vedas*: Ṛṣi Kaṇāda, who was content with only two *pramāṇas* — *pratyakṣa* and *anumāna*, takes recourse to *Vedas* in respect of all subtle matters as a source of knowledge. If that is the case with him, then what to say of people like us. This Ṛṣi Kaṇāda, after dislodging all the arguments of the opponents, establishes the existence of the fifth *bhūta*, that is *ākāśaḥ*, with the *hetu*, *śabda guṇa* in a long drawn discourse.

The quality which is grasped by the ears is called *śabda*. This *śabda* cannot be inherent in *vīṇā* or in bamboo. Therefore, there must be a substratum for this *śabda* and the substratum is what is called *ākāśa*. By several resonings, he has discarded the other matters as the *āśraya* (substratum) for the quality *śabda*. If sound resides in the *vīṇā* itself, then people sitting at a distance cannot hear this sound, because *vīṇā* does not travel from its place. Whereas if it is accepted that sound through the medium of *vīṇā* was generated in *ākāśa*, which in turn generated a series of sound waves till it reached the ear-drum of the people sitting in various directions, it is quite logical. Therefore, in the existence of *ākāśa*, *śabda* is the deciding factor. Getting out and entering in are other factors to prove that *ākāśa* is the cause for space.

Movement needs space and this is given by *ākāśa*. This is how the *Sāṁkhyas* argue. Ṛṣi Kaṇāda has effectively countered their arguments on this point. Even Bauddhas reject this argument "giving space" as the deciding factor for proving the existence of *ākāśa*. Wherever there is a quality in a thing created, it is seen that quality comes into being from the corresponding causes already existing, namely the colour of the cloth is derived from the colour of the thread used for weaving the cloth. In the same manner if *śabda* is a *guṇa* inherent in *vīṇā* then

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

that *guṇa* should be shown to exist in the causal elements of the *vīṇā* or its parts. It cannot be proved in this way. Therefore, *śabda* is not a *guṇa* of *pṛthivī* etc., but it must have its own substratum which is the fifth *mahābhūta* the *ākāśa.*

There was another argument by the Bauddhas — the absence of an obstructing agency, and that was called *ākāśa* and not a separate *bhūta.* Here, we can only say that Bauddhas are simply guided by their fanaticism and not by reasoning. Ordinary people can understand the absence of an obstruction like the wall. Simply with that much reasoning, they stop contented but accept or reject a substance like *ākāśa* which is very subtle and beyond the sense-perception; it is not sufficient. It needs sharp intellect and argumentative power but the ordinary people are not endowed with this quality and Bauddhas exploited this situation to their advantage.

In the sixth chapter of the *Chāndogya Upaniṣad* there is a dialogue between Śvetaketu and Uddālaka : "Bring the fruit of the *pīpal* tree. Here, it is. Breaking the seeds, what you see? Very small seeds. Break one of these small seeds. Again it is broken. What you see in it? I do not see anything. Dear son, that which you are not able to see in this small space, from that very space this great *peepal* tree standing before you has arisen. Therefore, have belief that this *ātmā* also is so subtle that it cannot be seen or experienced but all the created things are having their *ātmā* as their soul and this is the truth, and you are that".

When Śvetaketu says that he is not able to see anything within that small seed when broken up and from that very same thing Uddālaka says that the great *pīpal* tree has arisen, he wants his son to believe that. Bauddhas also would like their *śiṣyas*/followers to stop arguing and believe their statements. But that is not the end of it.

In the *Yājñavalkya Smṛti, Yati Dharma Prakaraṇa,* the formation of a child within the womb is described, where it is said that the child gets parts of all the five *bhūtas* and gets its body formed. By accepting or rejecting this theory nobody is going to gain anything or lose anything. It is just the state of affairs, as it exists. Because the blind man is not able to see it and gets dashed against it, it is not the fault of the post (pillar) that it exists there.

From the *bhūta ākāśa* the child gets the quality of *lightness, subtleness, śabda, guṇa, śrotra indriya* and *bala.* Once the body of the child is formed all these qualities exist in its body. This has been explained by Maharṣi Yājñavalkya and he goes on explaining the formation of the other qualities, too, in the body from the other *bhūtas.* Is it just to mislead the people?

A patient suffering from a disease gets medicine from the Doctor as per his diagnosis; the Doctor prescribes certain restrictions in regard to the intake of

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

food etc. The transformation of different kinds of food within the body and how they are to be tackled are known to the Doctor and not to the patient. Does that mean that the patient should disbelieve the Doctor.

Artha kriyā goes to prove the existence of a thing; this was one of the reasonings but even though *artha kriyā* might be there in a body, it may be invisible. It does not mean that it is not there. This can be seen in the case of the patient. After consuming the medicine he becomes hale and hearty. These are things which are ascertained by proper reasoning. An obstructing object like a wall or its absence as *ākāśa* as propounded by the Bauddhas does not stand to reasoning. When you negate a thing, the use of a negative word is common. This negative word does not denote the absence of a covering agent. In that case people should say, "there is no covering agent here". In this sentence they will use the word **here** as the basis for the experience. And that difference is the proof for the existence of *ākāśa*. That is the *ākāśa* intended by us and is denoted by the word **here**. "Here the Bird flies". In this sentence the *ādhāra* for the Bird to fly is *ākāśa*. It is a positive denotation and cannot be explained by the use of a negative word.

Let us consider another point. What are the meanings of these two words *ākāśa* and *śabda*? People dispute about this but they do accept that these two words have come to denote something. They are matters according to the *Mīmāṁsakas*. It is only a quality and not a matter according to *Naiyāyikas*. It is eternal according to the *Mīmāṁsakas* but it is **momentary** according to the *tārkikas*. In the first Chapter, first *Pada*, Sixth *Adhikaraṇa* of the *Pūrvamīmāṁsā* the quality of eternality of *śabda* is established. The qualities of sound, how they are transmitted and how they are received are all well-known to modern science today. All these are discussed in this chapter. It is further discussed there, whether the parts of the body like the **gullet, palate** etc., produce the sound or just help in making it audible. In this argument it was established that Air, which is still, at one point gets disturbed by the movement of the parts of the body, gets dislodged, and goes on generating waves travelling in all Directions. Because Air is not visible, we are not able to see their conjoint or disjoint functions.

In the *Yakṣa Praśna* of *Mahābhārata* there is a question — of the two things born simultaneously one is experienced first and the other later. Which are these two? The answer is lightning and the roaring of the clouds; from this one can understand that *śabda* is a matter which travels according to the *Mīmāṁsā*; it is eternal, all-pervading and a matter. We use the word *śabda* for those *dhvani* which make the *śabda* known by our ears. *Dhvani* gets transmitted in all directions because of the impact of *vāyu*. And thus, *śabda* is experienced by us. Therefore, subtleness is one cause for our not being able to prove or disprove

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

a thing. Therefore, we cannot simply deny the existence of a thing by its mere non-experience. Therefore, in things known not directly, we cannot deny anything just like that. Therefore, *ākāśa* the fifth *bhūta* and its two prior evolutes like *ahaṅkāra* and *mahat* are **Indisputable.** Non-visibility by ordinary people is not sufficient to deny their existence.

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust



Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection